# Shri Chidambareshvari Chidambareshvara Sammelana AshTottarashatanama Stotram

# શ્રીચિદમ્બરેશ્વરીચિદમ્બરેશ્વરસમ્મેલનાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information


Text title : chidambareshvarIchidambareshvarasammelanAShTottarashatanAma

File name : chidambareshvarIchidambareshvarasammelanAShTottarashatanAma.itx

Category : shiva, aShTottarashatanAmAvalI

Location : doc_shiva

Transliterated by : NA

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Latest update : May 14, 2020

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Shri Chidambareshvari Chidambareshvara Sammelana AshTottarashatanama Stotram

# શ્રીચિદમ્બરેશ્વરીચિદમ્બરેશ્વરસમ્મેલનાષ્ટોત્તરશતનામસ્તોત્રમ્

પૂર્વ પીઠિકા ॥

શ્રી શિવ ઉવાચાષ્ટોત્તરશતં વક્ષ્યે શ ૃણુ વિષ્ણો સમાહિતઃ ।
સદાશિવ ઋષિચ્છન્દો વિરાટ દેવો નટેશ્વરઃ ॥

ઇષ્ટ કામ્યાર્થ સિદ્ધ્યર્થે વિનિયોગો વરાનન ।
॥ ઉત્તર પીઠિકા ॥

નામ્નામષ્ટોત્તરશતં સ્ત્રીપુંલ્લિઙ્ગક્રમેણ તુ ।
સમ્પૂજ્ય દેવદેવેશૌ ભેજે સર્વાર્થસિદ્ધિદમ્ ॥ ૧॥

નમઃ શિવાય પઞ્ચાર્ણં ૐ જું સઃ સમ્પુટં જપેત્ ।
વૃત્તે મન્ત્રં બહિસ્ત્ર્યશ્રે ૐ જું સઃ ચાષ્ટ પત્રકે ॥ ૨॥

ત્રિયમ્બકં દલાગ્રે તુ સન્ધ્યાર્ણં માતૃકાવૃતમ્ ।
યન્ત્રં નિક્ષિપ્ય કલશે મણ્ડલં વિધિવદ્યજેત્ ॥ ૩॥

અયુતં પ્રજપેન્મન્ત્રં સાધ્યનામ પુરસ્સરમ્ ।
તતઃ શિવો ભાવનન્તુ સમિદ્ભિશ્ચતુરઙ્ગલૈઃ ॥ ૪॥

દુગ્ધાક્તસમિધા હ્યગ્નૌ સાહસ્ર ષટ્કકં હુનેત્ ।
યસ્તુ વહ્નૌ જુહોત્યેવં યાવત્સઙ્ખ્યેન સાધકઃ ॥ ૫॥

તાવત્ સઙ્ખ્યૈસ્સુધાકુમ્ભૈરઙ્ગ્રિં પ્રીણાતિ શઙ્કરઃ ।
આવ્યાધિઘ્નાઃ સદા સર્વં સહસ્રમીપ્સિતાન્ વરાન્ ॥ ૬॥

પ્રદદ્યાદાયુરાદીંશ્ચ દુરુક્તાત્ પ્રલયાન્તિકાન્ ।
ત્રિબીજાર્ણં ચ સાધ્યાખ્યં પાલયદ્વય બીજયુક્ ॥ ૭॥

અમૃત મૃત્યુઞ્જયાર્ણમથવા કમલા પુટમ્ ।
અમૃતા ચ વટા ચૈવ તિલં દૂર્વા પયો ઘૃતમ્ ॥ ૮॥

પાયસં સપ્તભિર્દ્રવ્યૈઃ સહસ્રં જુહુયાત્ પૃથક્ ।
ઘોરજરાધિવ્યાધીનાં દાહમોહપરિભ્રમમ્ ॥ ૯॥

ગ્રહપીડાપ્રશમનં શતાયુર્જીવનં તતઃ ।
યજેદ્ધોમદિને સપ્ત વિપ્રાન્ સુદક્ષિણાન્વિતમ્ ॥ ૧૦॥

હોમાવસાને વિપ્રાણાં દદ્યાત્ તામ્બૂલદક્ષિણામ્ ।
ગલૂચીં ખણ્ડશઃ કૃત્વા ચતુરઙ્ગુલમાનકમ્ ॥ ૧૧॥

જુહુયાદ્ દુગ્ધ સંસિક્તં સમ્યગ્ ભાનુસહસ્રકમ્ ।
અભિષેકં તતઃ કૃત્વા હ્યાયુરારોગ્યવર્ધનમ્ ॥ ૧૨॥

તિલ દૂર્વાઽમૃતાજ્યાભિરષ્ટોત્તરસહસ્રકમ્ ।
જન્મર્ક્ષદોષશમનં નિરુપદ્રવમુત્તમમ્ ॥ ૧૩॥

તિલામૃતઘૃતાન્ હુત્વા સહસ્રં મૃત્યુનાશનમ્ ।
છિન્નાકાશ્મર્યવકુલ સમિદ્ભિર્ઘૃતસંયુતં
હુત્વા સહસ્રં જન્મર્ક્ષે દોષઘ્નં રોગ નાશનમ્ ॥ ૧૪॥

પ્રોક્તે ધ્યાનજપાર્ચનાહુતિવિધાનાદ્યૈશ્ચ મૃત્યુઞ્જયં
યો મન્ત્રી પ્રજપન્મનું પ્રતિદિનં પ્રાતઃ પ્રસન્નાશયઃ ।
તસ્યેષ્ટાનિ ભવન્તિ સંસૃતિરપિ સ્ફીતા ચ પુત્રાદયઃ
સમ્પન્નાઃ સુસુખી ચ જીવતિ ચિરં દેહાપદસ્યાચ્છિવઃ ॥ ૧૫॥

અથ શ્રીચિદમ્બરેશ્વરી-શ્રીચિદમ્બરેશ્વરસમ્મેલનાષ્ટોત્તરશતનામાનિ ।

ૐ ચિદમ્બરેશ્વર્યૈ નમઃ । ચિદમ્બરેશ્વરાય નમઃ ।
હેમસભેશ્યૈ નમઃ । હેમસભેશાય નમઃ । ચિત્સભેશ્વર્યૈ નમઃ ।
ચિત્સભેશ્વરાય નમઃ । ચિદમ્બરસભાનાથાયૈ નમઃ ।
ચિદમ્બરસભાનાથાય નમઃ । ચિદમ્બરસભાપત્યૈ નમઃ ।
ચિદમ્બરસભાપતયે નમઃ । ચિદમ્બરપુરાધીશ્યૈ નમઃ ।
ચિદમ્બર પુરાધીશાય નમઃ । ચિદમ્બરસભાનટ્યૈ નમઃ ।
ચિદમ્બરસભાનટાય નમઃ । સભેશ્વર્યૈ સભેશ્વરાય નમઃ ।
સભામૂર્ત્યૈ નમઃ । સભામૂર્તયે નમઃ । સુસમ્રાજ્ઞ્યૈ નમઃ । સુસમ્રાજેનમઃ ।
સદસસ્પત્યૈ નમઃ । સદસસ્પતયે નમઃ । ચિન્મય્યૈ નમઃ ।
ચિન્મયાય નમઃ । ચિત્સભાનાથાયૈ નમઃ । ચિત્સભાનાથાય નમઃ ।
નટેશ્યૈ નમઃ । નટેશાય નમઃ । નટનાયક્યૈ નમઃ । નટનાયકાય નમઃ ।

સભામણ્યૈ નમઃ । સભામણયે નમઃ । સભાદીપ્રાયૈ નમઃ ।
સભાદીપ્રાય નમઃ । નટરાજ્ઞ્યૈ નમઃ । નટરાજે નમઃ ।
તાણ્ડવેશ્વર્યૈ નમઃ । તાણ્ડવેશ્વરાય નમઃ । પુણ્ડરીકપુરાધીશ્યૈ નમઃ ।
પુણ્ડરીકપુરાધીશાય નમઃ । ૨૦

ૐ પુણ્ડરીકપુરેશ્વર્યૈ નમઃ । પુણ્ડરીકપુરેશ્વરાય નમઃ ।
પુણ્ડરીકરુચ્યૈ નમઃ । પુણ્ડરીકરુચયે નમઃ । વન્દ્યાયૈ નમઃ ।
વન્દ્યાય નમઃ । પુણ્ડરીકાક્ષસેવિતાયૈ નમઃ । પુણ્ડરીકાક્ષસેવિતાય નમઃ ।
તિલ્વ રુદ્રાણ્યૈ નમઃ । તિલ્વરુદ્રાય નમઃ । મહારુદ્રાણ્યૈ નમઃ ।
મહા રુદ્રાય નમઃ । નૃત્તાઙ્ગ્યૈ નમઃ । નૃત્તાઙ્ગાય નમઃ ।
નૃત્તસુન્દર્યૈ નમઃ । નૃત્તસુન્દરાય નમઃ । પઞ્ચાક્ષર્યૈ નમઃ ।
પઞ્ચાક્ષરાય નમઃ । પરસ્મૈ જ્યોતિષે નમઃ । પરસ્મૈ
જ્યોતિષે નમઃ । સુન્દરાનન્દ વિગ્રહાયૈ નમઃ । સુન્દરાનન્દ વિગ્રહાય નમઃ ।
આનન્દ નટનાધીશ્યૈ નમઃ । આનન્દ નટનાધીશાય નમઃ ।
સચ્ચિદાનન્દવિગ્રહાયૈ નમઃ । સચ્ચિદાનન્દવિગ્રહાય નમઃ । વ્યોમ
વ્યોમ્ને નમઃ । વ્યોમવ્યોમ્ને નમઃ । વ્યોમકેશ્યૈ નમઃ । વ્યોમકેશાય નમઃ ।
ચિન્મહાવ્યોમતાણ્ડવાયૈ નમઃ । ચિન્મહાવ્યોમતાણ્ડવાય નમઃ ।
અમ્બરાધીશ્વર્યૈ નમઃ । અમ્બરાધીશ્વરાય નમઃ । હંસ્યૈ નમઃ ।
હંસાય નમઃ । કુઞ્ચિતાઙ્ઘ્ર્યૈ નમઃ । કુઞ્ચિતાઙ્ઘ્રયે નમઃ ।
ચિદમ્બરાયૈ નમઃ । ચિદમ્બરાય નમઃ । ૪૦

ૐ તિલ્વવાસાયૈ નમઃ । તિલ્વવાસાય નમઃ । ચિદીશાન્યૈ નમઃ ।
ચિદીશાનાય નમઃ । વિરાજ્ઞ્યૈ નમઃ । વિરાજે નમઃ । તિલ્વ
વનાધિપાયૈ નમઃ । તિલ્વવનાધિપાય નમઃ । ત્રૈલોક્યસુન્દર્યૈ નમઃ ।
ત્રૈલોક્યસુન્દરાય નમઃ । તિલ્વવન્યૈ નમઃ । તિલ્વવનાય નમઃ ।
તિલ્વપુરેશ્વર્યૈ નમઃ । તિલ્વપુરેશ્વરાય નમઃ । વ્યાઘ્રચર્મધરાયૈ
નમઃ । વ્યાઘ્રચર્મધરાય નમઃ । વ્યાઘ્રપુરેશ્યૈ નમઃ ।
વ્યાઘ્રપુરેશાય નમઃ । વ્યાઘ્રપાત્પ્રિયાયૈ નમઃ । વ્યાઘ્રપાત્પ્રિયાય
નમઃ । કૃપાનિધ્યૈ નમઃ । કૃપાનિધયે નમઃ । મહાકાલ્યૈ નમઃ ।
મહાકાલાય નમઃ । વ્યાઘ્રપાદપ્રપૂજિતાયૈ નમઃ । વ્યાઘ્રપાદપ્રપૂજિતાય
નમઃ । મન્ત્રવિગ્રહાયૈ નમઃ । મન્ત્રવિગ્રહાય નમઃ । ઓઙ્કાર્યૈ નમઃ ।
ઓઙ્કારાય નમઃ । સિંહવર્મ પ્રપૂજિતાયૈ નમઃ । સિંહવર્મપ્રપૂજિતાય
નમઃ । જટાધરાયૈ નમઃ । જટાધરાય નમઃ । લલાટાક્ષ્યૈ નમઃ ।

લલાટાક્ષાય નમઃ । પતઞ્જલિવરપ્રદાયૈ નમઃ । પતઞ્જલિ
વરપ્રદાય નમઃ । અપસ્માર હરાયૈ નમઃ । અપસ્મારહરાય નમઃ । ૬૦

ૐ સર્પભૂષણાયૈ નમઃ । સર્પભૂષણાય નમઃ ।
ફણિરાટ્પ્રિયાયૈ નમઃ । ફણિરાટ્ પ્રિયાય નમઃ ।
મહાકામેશ્વર્યૈ નમઃ । મહાકામેશ્વરાય નમઃ ।
વજ્રેશ્વર્યૈ નમઃ । વજ્રેશ્વરાય નમઃ ।
પ્રાસાદ વિગ્રહાયૈ નમઃ । પ્રાસાદવિગ્રહાય નમઃ । આનન્દતાણ્ડવાયૈ નમઃ ।
આનન્દતાણ્ડવાય નમઃ । રક્તપાદાયૈ નમઃ । રક્તપાદાય નમઃ ।
સુન્દરતાણ્ડવાયૈ નમઃ । સુન્દરતાણ્ડવાય નમઃ । હરિપ્રિયાયૈ નમઃ ।
હરિપ્રિયાય નમઃ । હરાયૈ નમઃ । હરાય નમઃ । શામ્ભવ્યૈ નમઃ ।
શમ્ભવે નમઃ । ઈશ્વર્યૈ નમઃ । ઈશ્વરાય નમઃ । જૈમિનિપ્રિયાયૈ નમઃ ।
જૈમિનિપ્રિયાય નમઃ । મણિનૂપુરપાદાયૈ નમઃ । મણિનૂપુરપાદાય નમઃ ।
શ્રીચક્રવાસાયૈ નમઃ । શ્રીચક્રવાસાય નમઃ । ઉમાપત્યૈ નમઃ ।
ઉમાપતયે નમઃ । ત્રિલોચનાયૈ નમઃ । ત્રિલોચનાય નમઃ ।
શૂલપાણયે નમઃ । શૂલપાણયે નમઃ । ભૂતેશ્યૈ નમઃ । ભૂતેશાય નમઃ ।
વૃષભધ્વજાયૈ નમઃ । વૃષભધ્વજાય નમઃ । ૮૦

ૐ શ્રીચક્રપ્રિયાયૈ નમઃ । શ્રીચક્રપ્રિયાય નમઃ । ઉગ્રાઙ્ગ્યૈ નમઃ ।
ઉગ્રાઙ્ગાય નમઃ । ત્રિપુરાયૈ નમઃ । ત્રિપુરાય નમઃ ।
ત્રિપુરેશ્વર્યૈ નમઃ । ત્રિપુરેશ્વરાય નમઃ । મન્ત્રમૂર્ત્યૈ નમઃ ।
મન્ત્રમૂર્તયે નમઃ । સભાચક્રાયૈ નમઃ । સભા ચક્રાય નમઃ ।
ચક્ર રાજ્ઞ્યૈ નમઃ । ચક્ર રાજે નમઃ । ચક્ર વિગ્રહાયૈ નમઃ ।
ચક્ર વિગ્રહાય નમઃ । પરપ્રકાશાયૈ નમઃ । પરપ્રકાશાય નમઃ ।
શિવકામસુન્દર્યૈ નમઃ । શિવકામસુન્દરાય નમઃ । પરાત્પરાયૈ નમઃ ।
પરાત્પરાય નમઃ । પરમેશ્વર્યૈ નમઃ । પરમેશ્વરાય નમઃ ।
સભેશ્યૈ નમઃ । સભેશાય નમઃ । શ્રીમદ્ભ્રસભેશ્વર્યૈ નમઃ ।
શ્રીમદ્ભ્રસભેશ્વરાય નમઃ । મહેશ્વર્યૈ નમઃ । મહેશ્વરાય નમઃ ।
મહાદેવ્યૈ નમઃ । મહાદેવાય નમઃ । શઙ્કર્યૈ નમઃ ।
શઙ્કરાય નમઃ । ચન્દ્રશેખરાયૈ નમઃ । ચન્દ્રશેખરાય નમઃ ।
ઈશાયૈ નમઃ । ઈશાય નમઃ । તત્પુરુષાયૈ નમઃ । તત્પુરુષાય નમઃ । ૧૦૦

ૐ અઘોરાયૈ નમઃ । અઘોરાય નમઃ । વામાયૈ નમઃ । વામાય નમઃ ।
સદ્યાયૈ નમઃ । સદ્યાય નમઃ । સદાશિવાયૈ નમઃ । સદાશિવાય નમઃ ।

ભુવનેશાયૈ(શ્યૈ)નમઃ । ભુવનેશાય નમઃ । વિશ્વનાથાયૈ નમઃ ।
વિશ્વનાથાય નમઃ । શિવાયૈ નમઃ । શિવાય નમઃ ।
ત્રિપુરસુન્દર્યૈ નમઃ । ત્રિપુરસુન્દરાય નમઃ । ૧૦૮

ૐ શ્રીશિવકામસુન્દરીસમેત શ્રીચિત્સભેશ્વરાય નમઃ ।

ઇતિ શ્રીચિદમ્બરરહસ્યોક્તાનિ શ્રીચિદમ્બરેશ્વરી
શ્રીચિદમ્બરેશ્વરસમ્મેલનાષ્ટોત્તરશતનામાનિ ।

Proofread by Aruna Narayanan

*Shri Chidambareshvari Chidambareshvara Sammelana AshTottarashatanama Stotram*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*